# Guhanama Skanda Sangrahah

# ગુહનામસ્કાન્દસઙ્ગ્રહઃ

## Document Information

Text title : Skandasamgrahah Guha Namavali

File name : skAndasaMgrahaHguhanAmAvaliH.itx

Category : subrahmanya, nAmAvalI

Location : doc_subrahmanya

Proofread by : Preeti Bhandare

Latest update : April 25, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ગુહનામસ્કાન્દસઙ્ગ્રહઃ

સર્વમઙ્ગલાજાનિઃ શરણમ્ ।
ૐનમઃ શ્રીમતે શરવણભવાય ।
અથ ગુહનામસ્કાન્દસઙ્ગ્રહઃ ।
॥ મઙ્ગલમ્ ॥

ધ્યાયામ્યન્તર્નાથં શક્તિસનાથં મુખે વશાનાથમ્ ।
પ્રમથાના મધિનાથં વિઘ્નવિમાથં કૃતારિકુલમાથમ્ ॥ ૧॥

સુબ્રહ્મણ્યં કલયે સતતં હૃદયેઽખિલાપદુદ્ધૃતયે ।
નિર્મલવાગ્વિસ્તૃતયે બહુનિર્વૃતયેઽખિલાગમાગતયે ॥ ૨॥

અથ દક્ષકાણ્ડમ્ ।
ઈશ્વરસમ્બોધનાન્તઃ ।
॥ કથાસઙ્ગ્રહઃ ॥

શુદ્ધબ્રહ્મપરેશ ગુરો
સિદ્ધવેષધૃતિદક્ષ ગુરો
સદ્ધર્માકૃતિવાહ ગુરો
વિદ્ધસુરારિસનૂહ ગુરો શુદ્ધબ્રહ્મ ॥ ૧॥

ઈશપ્રસાદઙ્ગતશ્રીદક્ષો ગુરો
કોશરાજ્યભારવાહઃ શ્રીદક્ષો ગુરો
ઈશ્વરીં તનયામાપ્તુમતપત્ ગુરો
ભાસ્વરપ્રબદ્ધાઞ્જલિઃ શ્રીદક્ષો ગુરો શુદ્ધબ્રહ્મ ॥ ૨॥

વેદવલ્લીજાનિરાસીત્ શ્રીદક્ષો ગુરો
જાતદ્વિસહસ્રપુત્રઃ શ્રીદક્ષો ગુરો
દ્યોતિસપ્તપુત્રીયુતઃ શ્રીદક્ષો ગુરો
મોદમાપગૌર્યાપુત્ર્યાશ્રીદક્ષો ગુરો શુદ્ધબ્રહ્મ ॥ ૩॥

કપાલિન્ કલ્યાણેમધ્યેન્તર્હિતો ગુરો
તપસ્પન્સ્યાઃ પુરોવિપ્રવેષ ગુરો
અપરિમિતરૂપં સાદદર્શ ગુરો
કોપાવિષ્ટોદક્ષોપિત્વાન્નિનિન્દ ગુરો શુદ્ધબ્રહ્મ ॥ ૪॥

જામાતૃસપ્તતાપસઃ શ્રીદક્ષો ગુરો
જામાતૃભૂતસ્ત્વમપિદક્ષસ્ય ગુરો
દાતારં ત્વામનાહૂય યાગવાન્ ગુરો
માતાદાક્ષાયણીકોપમાપશ્રી ગુરો શુદ્ધબ્રહ્મ ॥ ૫॥

શમ્ભો મહિમાદધીચિબોધિતો ગુરો
શમ્ભુવિનાનકુર્વિતિપ્રાહસ ગુરો
અમ્બાતવનિકટં પ્રાપ્તાનિન્દિતા ગુરો
ડિમ્ભવીરલુપ્તદક્ષયાગ ગુરો શુદ્ધબ્રહ્મ ॥ ૬॥

ધાવદિન્દ્રદેવસૈન્યપાલ ગુરો
દેવમેષમુખદક્ષપ્રાર્થિત ગુરો
પાપહરસ્તોત્રકારિદક્ષપ ગુરો
શાપનિવારણદક્ષશુભદ ગુરો શુદ્ધબ્રહ્મ ॥ ૭॥

ઇતિ દક્ષકાણ્ડઃ ॥

અથ સમ્ભવકાણ્ડમ્ ।
ઈશ્વરવર્ણનમ્ ।
શુદ્ધસનકમુનિવન્દ્ય ગુરો
રુદ્ધમદનમદભાર ગુરો
બદ્ધહસ્તમુનિસેવ્ય ગુરો
વૃદ્ધવેષધરપૂર્વ ગુરો દેવદેવ ॥ ૮॥

દેવદેવ જગદીશ ગુરો
દેવદેવશુભદાયિ ગુરો
દેવદેવચિદધીશ ગુરો
દેવદેવમનુદાયિ ગુરો દેવદેવ ॥ ૯॥

સર્વજ્ઞાસપ્તઋષિપ્રેષક ભો
પર્વતતનયોદ્વાહક ભો
ગર્વહરમુનિયામ્યપ્રેષક ભો

ખર્વભિન્નનતિરતિરક્ષક ભો દેવદેવ ॥ ૧૦॥

અગ્નિમુખસ્તુતવિભવવિ ભો
ભુગ્નવદનામ્બુજગૌર્યઙ્ક ભો
ઉદ્વિગ્નગઙ્ગાવાહિતવીર્યવિ ભો
અઘઘ્નશરવણજષટ્ સુતવિ ભો દેવદેવ ॥ ૧૧॥

અથ સુબ્રહ્મણ્યવર્ણનમ્ ।
ષણ્મુખવિલસિતસુન્દર ગુહોમ્
ચિન્મુખકૃત્તિકાસ્ત્રીપાલિત ગુહોમ્
સન્મુખોમાકૃતાલોકાલિઙ્ગન ગુહોમ્
સમ્યક્સ્રુપાત્રપયઃપ્રાશન ગુહોમ્ દેવદેવજયવલ્લીશ ॥ ૧૨॥

દેવદેવજયવલ્લીશ
દેવદેવજયસેનેશ
દેવદેવશિવબાલેશ
દેવદેવગુહનામેશ ॥ ૧૩॥

શાપગતમુનિજપાલ ગુહોમ્
પાપહરશરવણેશ ગુહોમ્
તાપત્રયહર દેવ ગુહોમ્
કોપરહિત શુભરૂપ ગુહોમ્ દેવદેવજય ॥ ૧૪॥

બાલમનોહરેતિગીત ગુહોમ્
લાલાજાલયુતચક્રમ ગુહોમ્
ડોલાપદોદ્ધૂનનલલિત ગુહોમ્
શીલોભયકુલદીપ્રદીપક ગુહોમ્ દેવદેવજય ॥ ૧૫॥

મન્દમન્દપદગમન ગુહોમ્
ઇન્દુવદનકુન્દરદન ગુહોમ્
મન્દસ્મિતકમ્બુકન્ધર ગુહોમ્
ગન્ધશરીરેત્યુમાગીત ગુહોમ્ દેવદેવજય ॥ ૧૬॥

કૃતરોષમેષમદમોષ ગુહોમ્
નતબદ્ધમુક્તબ્રહ્મદેવ ગુહોમ્
દ્રુતકૃતપ્રણવોપદેશ ગુહોમ્
હિતકરશઙ્કરપ્રસાદ ગુહોમ્ દેવદેવજય ॥ ૧૭॥

ગર્ભાષ્ટમઉપનીત ગુહોમ્
દૌર્ભાગ્યાપહરવિઘ્નેશ ગુહોમ્
નિર્ભરલીલાજાલસંયુત ગુહોમ્
દર્ભરશનાવેષ્ટિતામ્બર ગુહોમ્ દેવદેવજય ॥ ૧૮॥

નારદબોધિતવચન ગુહોમ્
તારકહરક્રૌઞ્ચદલન ગુહોમ્
ધીરક્રૌઞ્ચબિલમોચક ગુહોમ્
વીરબાહ્વાદિસ્તુતવિભવ ગુહોમ્ દેવદેવજય ॥ ૧૯॥

હિમગિરિદેવગિરિચાર ગુહોમ્
દ્રુમયુતવૃદ્ધગિરિચાર ગુહોમ્
ભ્રમહરવેઙ્કટાદ્રિચાર ગુહોમ્
શ્રમહરારુણાચલચાર ગુહોમ્ દેવદેવજય ॥ ૨૦॥

કેદારેશક્ષેત્રાદિગમન ગુહોમ્
જ્યોતિર્મયકાલહસ્તિગમન ગુહોમ્
ભૂતિદાયિવિરૂપાક્ષગમન ગુહોમ્
ભીતિહરવટારણ્યગમન ગુહોમ્ દેવદેવજય ॥ ૨૧॥

કાશીવિશ્વનાથક્ષેત્રગમન ગુહોમ્
ભૂષિતવરશ્રીશૈલગમન ગુહોમ્
શોભિતકાઞ્ચીનગરગમન ગુહોમ્
મોદિતચિદમ્બરેશગમન ગુહોમ્ દેવદેવજય ॥ ૨૨॥

તુઙ્ગસ્વર્ણમુખીનદીસઙ્ગત ગુહોમ્
મઙ્ગલદમણિનદીસઙ્ગત ગુહોમ્
તુઙ્ગામલપેણ્ણાનદીસઙ્ગત ગુહોમ્
સઙ્ગમકાવેરીતીરસઙ્ગત ગુહોમ્ દેવદેવજય ॥ ૨૩॥

મરુપ્રદેશસઞ્ચારષણ્મુખ ગુહોમ્
સુરુચિરપરાચલસઙ્ગત ગુહોમ્
નિરુપમમુનિપુત્રસઙ્ગત ગુહોમ્
વરુણાલયાગ્રસન્ધિસઙ્ગત ગુહોમ્ દેવદેવજય ॥ ૨૪॥

ઇતિ સમ્ભવકાણ્ડમ્ ॥

અથાસુરકાણ્ડમ્ ।
વન્દિતામરાચાર્યવેદિત ગુહોમ્
ચિન્તિસુરવૃત્તાન્તજન્ય ગુહોમ્
અથ સુબ્રહ્મણ્યં પ્રતિ દેવગુરુવચનમ્ ।
પણ્ડિતકાશ્યાપોનામવર્તતે ગુહોમ્
ચણ્ડિકામાયાનામતં યયૌ ગુહોમ્ દેવદેવજય ॥ ૨૫॥

માયાયાઃ પ્રથમયામેશૂરો ગુહોમ્
ભૂયોદ્વિતીયેજનિસિંહાસ્યો ગુહોમ્
દાયાદસ્તૃતીયયામેતારકો ગુહોમ્
કાયાઢ્યાતુરીયયામેઽજામુખી ગુહોમ્ દેવદેવજય ॥ ૨૬॥

આર્યશુક્રોપદિષ્ટશ્શૂરો ગુહોમ્
વીરયાગમકૃતશૂરો ગુહોમ્
આર્યશિવપ્રસાદમાપ ગુહોમ્
વીર્યપાશુપતાસ્ત્રમ્પ્રાપ ગુહોમ્ દેવદેવજય ॥ ૨૭॥

ઇન્દ્રાદિદિગ્વિજયં વ્યધિત ગુહોમ્
વન્ધ્યવૈકુણ્ઠજયમકૃત ગુહોમ્
નન્ધ્યકૈલાસઙ્ગતશ્શૂરો ગુહોમ્
સાન્દ્રવીરમહેન્દ્રાધારો ગુહોમ્ દેવદેવજય ॥ ૨૮॥

શૂરભીત્યાવિંશતાભૃદિન્દ્રો ગુહોમ્
ચાર્વગસ્ત્યાનીતાભુવિકાવેરી ગુહોમ્
વીરક્રૌઞ્ચશાપકારીકુમ્ભજો ગુહોમ્
ધીરકુમ્ભજજિતોવિન્ધ્યો ગુહોમ્ દેવદેવજય ॥ ૨૯॥

વિજિતેલ્વલવાતાપિઃકુમ્ભજો ગુહોમ્
વિહિતકુદ્દાલગતિઃ કુમ્ભજો ગુહોમ્
ગલિતેન્દ્રાણીરક્ષકશ્શાસ્તા ગુહોમ્
જ્વલિતશાસ્તૃવૃત્તાન્તવાદીન્દ્રો ગુહોમ્ દેવદેવજય ॥ ૩૦॥

મોહિન્યઙ્ગગલિતાગણ્ડકીનદી ગુહોમ્
વેદવેદ્યસાલગ્રામાજાતા ગુહોમ્
મોહિતાજામુખીખણ્ડિતેન્દ્રાણી ગુહોમ્

નાશિતકરાકાલેનાજામુખી ગુહોમ્ દેવદેવજય ॥ ૩૧॥

ભાનુકોપેનબદ્ધોજયન્તો ગુહોમ્
તેનભિન્નદન્તોગજેન્દ્રો ગુહોમ્
ધ્યાયન્નાપગજશ્વેતારણ્યં ગુહોમ્
જ્ઞાનિગુરુણેત્થમ્ભક્ત્યાવેદિત ગુહોમ્ દેવદેવજય ॥ ૩૨॥

ઇત્યાસુરકાણ્ડમ્ ॥

અથ વીરમહેન્દ્રકાણ્ડમ્ ।
ગુહનામાવલિઃ ।
ચારભાવગતવીરબાહો ગુહોમ્
શૂરબુદ્ધિવાદિવીરબાહુ ગુહોમ્
વીરબાહુઘાતિતસૈન્ય ગુહોમ્
ધીરસનીડગામિવીર ગુહોમ્ દેવદેવમય ॥ ૩૩॥

શૂરપદ્મસિંહવક્ત્રેણેડિત ગુહોમ્
તીરહેમકૂટનગરાવાસ ગુહોમ્
અપારકરુણામૃતમાનસ ગુહોમ્
ઉદારભાનુકોપદર્શક ગુહોમ્ દેવદેવજય ॥ ૩૪॥

ઇતિ વીરમહેન્દ્રકાણ્ડમ્ ॥

અથ યુદ્ધકાણ્ડમ્ ।
પ્રેષિતપાશુપતવીર ગુહોમ્
ભીષિતગતભાનુકોપ ગુહોમ્
તતશ્ચ સમ્બોધનાન્તઃ
॥ કથા સઙ્ગ્રહઃ ॥

દૂષિતસ્ત્વયારણેશૂરો ગુહોમ્
દૂષિતંશૂરતિરોધાનં ગુહોમ્ દેવદેવજય ॥ ૩૫॥

ભૂયોપ્યતિબાહુભાનુકોપૌ ગુહોમ્
પ્રાયોહિસમાનસૈન્યયુદ્ધો ગુહોમ્
ભૂયોપિસમુદ્રક્ષિપ્તંસૈન્યં ગુહોમ્
ભૂયોપિસુશક્ત્યાકૃષ્ટંસૈન્યં ગુહોમ્ દેવદેવજય ॥ ૩૬॥

॥ સુબ્રહ્મણ્યસ્તોત્રમ્ ॥

વિદિતહિરણ્યમત્સ્યભાવદ ગુહોમ્
પાતિતાગ્નિમુખાદિરિપુસુત ગુહોમ્
વિહિતવિજયયુદ્ધમુદિત ગુહોમ્
જરિતવિકૃતધર્મકોપાદે ગુહોમ્ દેવદેવજય ॥ ૩૭॥

પરિહતભાનુકોપવીર ગુહોમ્
અથ કથા ।
સુરતતિસાગરેઽક્ષિપત્સિંહ્મો ગુહોમ્
સરલશક્ત્યાકર્ષિતાદેવા ગુહોમ્
હનનવિરલોદરસ્સિંહ્માસ્યો ગુહોમ્ દેવદેવજય ॥ ૩૮॥

માયયાણ્ડાકૃષ્ટસૈન્યઃ શૂરો ગુહોમ્
માયાબલસર્વાકારશ્શૂરો ગુહોમ્
માયાસુરભિજીવિતસૈન્યો ગુહોમ્
ભૂયોપ્યપહતં શૂરસૈન્યં ગુહોમ્ દેવદેવજય ॥ ૩૯॥

અથ સ્તોત્રમ્ ।
વિશ્વરૂપતુષ્ટશૂરષણ્મુખ ગુહોમ્
વિશ્વાહૃતજ્ઞાનશૂરષણ્મુખ ગુહોમ્
વિશ્વાસશૂરવધષણ્મુખ ગુહોમ્
વિશ્વમ્ભરાસુનાયકષણ્મુખ ગુહોમ્ દેવદેવજય ॥ ૪૦॥

ઇતિ યુદ્ધકાણ્ડમ્ ॥

અથ દેવકાણ્ડમ્ ।
શ્રીસન્ધિનગરયાતષણ્મુખ ગુહોમ્
શ્રીપરાચલેકુઞ્જરીવિવાહ ગુહોમ્
શ્રીપુરન્દરપટ્ટાભિષેક ગુહોમ્
શ્રીવરગુહાદ્રિગતદેવ ગુહોમ્ દેવદેવમય ॥ ૪૧॥

નારદેનવલ્યુદ્વાહકરણ ગુહોમ્
તારપરિપૂર્ણગિરિવાસ ગુહોમ્
દારદ્વયાશ્લિષ્ટદિવ્યદેહ ગુહોમ્
નારદાદિસ્તુત્યસ્કન્દશૈલ ગુહોમ્ દેવદેવજય ॥ ૪૨॥

ગુહનામસ્કાન્દપાઠિભક્તસ્ય ગુહોમ્
ઇહપરાભીષ્ટસિદ્ધિર્ન્દેહિભો ગુહોમ્

બૃહન્મેહાપસ્મારાદિહરણમ્ ગુહોમ્
મહદૈશ્વર્યપ્રમાવં ષણ્મુખ ગુહોમ્ દેવદેવજય ॥ ૪૩॥

સ્કાન્દપ્રોક્તશિખિનગેશ ગુહોમ્
શાન્તસુમુખશિખિનગેશ ગુહોમ્
સ્વાન્તર્ભુવનશિખિનગેશ ગુહોમ્
નાન્તમધ્યાદેશિખિનગેશ ગુહોમ્ દેવદેવજય ॥ ૪૪॥

શરવણભવશિખિનગેશ ગુહોમ્
રણપરાક્રમશિખિનગેશ ગુહોમ્
વનવલ્લીપ્રિયશિખિનગેશ ગુહોમ્
ભવભયહરશિખિનગેશ ગુહોમ્ દેવદેવજય ॥ ૪૫॥

સર્વલોકપાલશિખિનગેશ ગુહોમ્
સર્વાઙ્ગસુન્દરશિખિનગેશ ગુહોમ્
સર્વદેવાત્મકશિખિનગેશ ગુહોમ્
સર્વમઙ્ગલદશિખિનગેશ ગુહોમ્ દેવદેવજય ॥ ૪૬॥

ઇતિ શ્રીમયૂરગિરિવાસ્તવ્ય
સુબ્બય્યાર્યસ્ય ગણપતિસુબ્રહ્મણ્યશર્મણઃ કૃતિષુ
સ્કાન્દસઙ્ગ્રહગુહનામાવલિસ્સમ્પૂર્ણા ॥

સર્વમઙ્ગલાજાનિઃ શરણમ્ ॥

Encoded and proofread by Preeti Bhandare

*Guhanama Skanda Sangrahah*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*